# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| कक्षा-आचार्य(SEM-3)(New&Old) | प्रश्नपत्रम् – 2 | गुणाः –70 |
|---|---|---|
| विषयः – रामानुजवेदान्तः | कोड –C.C.5.3.7 | समयः- 3 तः 6 पर्यन्तम् |
| दिनाङ्कः –10/10/2019 | सन्दर्भग्रन्थः – श्रीभाष्यम् | |

### प्रथमान्वितिः (Unit 1)

गुणाः

**प्रश्न १ कस्यचिदेकस्य सूत्रस्य व्याख्यात्मकमुत्तरं लिखत।** ५

१ प्राणगतेश्च।

२ मुग्धेऽर्धसंपत्तिः परिशेषात्।

**प्रश्न २ कस्यचिदेकस्य उत्तरं लिखत।** १०

१ देहात् देहान्तरं गच्छन्नयं जीवः देहान्तरारम्भहेतुभिः भूतसूक्ष्मैः सम्परिष्वक्त एव गच्छति उत न इति सविशदं विवेचयत।

२ जीवस्य स्वप्नावस्थां यथासिद्धान्तं परीक्ष्यताम्।

### द्वितीयान्वितिः (Unit 2)

**प्रश्न ३ अधस्तनमंत्रयोरेकस्य मंत्रस्य व्याख्यानं यथाग्रन्थं विधेयम्।** ५

१ समान एवं चाभेदात्।

२ अनियमः सर्वेषामविरोधः शब्दानुमानाभ्याम् ।

**प्रश्न ४ कस्यचिदेकस्य सविस्तरम् उत्तरं लेख्यम्।** १०

१ सर्वाभेदाधिकरणं सविशदं निरूपयत।

२ साम्परायाधिकरणं यथाग्रन्थं प्रतिपादयत।

### तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधस्तनसूत्रयोः सूत्रमेकं विवेचयत।** ५

१ आदरादलोपः।

२ नानाशब्दादिभेदात्।

**प्रश्न ६ कस्यचिदेकस्य विस्तरेण उत्तरं लेख्यम्।** १०

१ किमयं प्रत्यगात्मा ज्ञाता कर्ता भोक्ता इहामुत्र संचारक्षमोऽनुसंधेयः उत प्रजापति –
वाक्योदितापहतपाप्मत्वादि स्वरूपः ? किं युक्तमिति सिद्धान्तमनुसृत्य विवेचयत।

२ पूर्वविकल्पाधिकरणं यथाग्रन्थं प्रतिपादयत।

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ कस्याप्येकस्य सूत्रस्य व्याख्यानं विधेयम्।** ५

१ पुरुषार्थोक्तिः शब्दादिति बादरायणः।

२ अतस्वितरज्यायो लिंगाच्च।

**प्रश्न ८ कस्यचिदेकस्य उत्तरं लेख्यम्।** १०

१ प्रच्युतानामपि ब्रह्मविद्यायामधिकारोऽस्ति उत नेति यथाग्रन्थं समीक्ष्यताम्।

२ स्तुतिमात्राधिकरणं यथाभाष्यं विवेचयत।

**प्रश्न ९ दशप्रश्नानामतिलघूत्तराणि लिखत।** १०

१ को नाम नुशयः?

२ 'रमणीय चरणाः' इत्यत्र चरणशब्दः कस्मिन्नर्थे प्रसिद्धोऽस्ति?

३ तृतीयाध्यायस्य प्रथमपदे कति सूत्राणि सन्ति?

४ प्रथमपादे कति सन्त्यधिकरणानि?

५ उपास्यं  ब्रह्म उत परं ब्रह्म?

६ सन्ध्ये सृष्टेः कर्ता कः?

७ किं सुषुप्त एव प्रबोधसमये उत्तिष्ठति उतान्यः?

८ द्वयोः शाखयोः वर्णितोद्गीतविधैक्यं उत न?

९ अन्योऽन्तर आत्माऽऽनंदमयः इत्यत्र आत्मशब्देन किं गृह्यते?

१० साम्यपरायाधिकरणे कति सूत्राणि सन्ति?

११ सर्वविधैक्यं किमर्थमस्ति?

१२ प्रतर्दनः कस्य पुत्रः आसीत्?

१३ आश्रमाः कति सन्ति? के च ते?

१४ किं समाप्य गृही भवेत्?

१५ तृतीयाध्यायस्य चतुर्थपादे कति सूत्राणि सन्ति?